# laghujAtakam by varAhamihirAchArya

# વરાહમિહિરાચાર્યસ્ય લઘુજાતકમ્

## Document Information

Text title : laghujAtakam by varAhamihirAchArya

File name : laghujAtaka.itx

Category : jyotisha, sociology_astrology, varAhamihira

Location : doc_z_misc_sociology_astrology

Author : Varahamihira

Transliterated by : Radu Canahai clradu at yahoo.com

Proofread by : Radu Canahai, Marthi Narayana Sarma

Latest update : June 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 30, 2022

*sanskritdocuments.org*

# વરાહમિહિરાચાર્યસ્ય લઘુજાતકમ્

અધ્યાયાઃ અનુક્રમણિકા

૧. રાશિપ્રભેદાધ્યાયઃ
૨. ગ્રહભેદાધ્યાયઃ
૩. ગ્રહમૈત્રીવિવેકાધ્યાયઃ
૪. ગ્રહસ્વરુપાધ્યાયઃ
૫. ગર્ભાધાનાધ્યાયઃ
૬. સૂતિકાધ્યાયઃ
૭. અરિષ્ટભઙ્ગાધ્યાયઃ
૮. અરિષ્ટધ્યાયઃ
૯. આયુર્દાયાધ્યાયઃ
૧૦. દશાન્તર્દશાધ્યાયઃ
૧૧. અષ્ટકવર્ગાધ્યાયઃ
૧૨. પ્રકીર્ણાધ્યાયઃ
૧૩. નાભસયોગાધ્યાયઃ
૧૪. સ્ત્રીજાતકાધ્યાયઃ
૧૫. નિર્યાણાધ્યાયઃ
૧૬. નષ્ટજાતકાધ્યાયઃ

## અથ રાશિપ્રભેદાધ્યાયઃ ॥ ૧॥

યસ્યોદયાસ્તસમયે સુરમુકુટનિઘૃષ્ટચરણકમલોઽપિ ।
કુરુતેઽઞ્જલિં ત્રિનેત્રઃ સ જયતિ ધામ્નાં નિધિ સૂર્યઃ ॥ ૧॥

હોરાશાસ્ત્રં વૃત્તૈર્મયા નિબધં નરીક્ષ્ય શાસ્ત્રાણિ ।
યત્તસ્યાપ્યાર્યાભિઃ સારમહં સંપ્રવક્ષ્યામિ ॥ ૨॥

યદુપચિતમન્યજન્મનિ શુભાઽશુભં તસ્ય કર્મણઃ પઙ્ક્તિમ્ ।

વ્યઞ્જયતિ શાસ્ત્રમેતત્ તમસિ દ્રવ્યાણિ દીપ ઇવ ॥ ૩॥

શીર્ષમુખબાહુહૃદયોદરાણિ કટિબસ્તિગુહ્યસંઙ્ઞાનિ ।
ઊરૂ જાનૂ જઙ્ઘે ચરણાવિતિ રાશયોઽજાદ્યાઃ ॥ ૪॥

કાલનરસ્યાવયવાન્ પુરુષાણાં ચિન્તયેત્પ્રસવકાલે ।
સદસદ્ગ્રહસંયોગાત્ પુષ્ટાઃ સોપદ્રવાસ્તે ચ ॥ ૫॥

અરુણસિતહરિતપાટલપાણ્ડુવિચિત્રા સિતેતરપિશઙ્ગૌ ।
પિઙ્ગલકર્બુરબભ્રુકમલિના રુચયો યથાસઙ્ખ્યમ્ ॥ ૬॥

પુંસ્ત્રી-ક્રૂરાઽક્રૂરૌ ચર-સ્થિર-દ્વિસ્વભાવસંજ્ઞાશ્ચ ।
અજવૃષમિથુનકુલીરાઃ પઞ્ચમનવમૈઃ સહૈન્દ્યાદ્યાઃ ॥ ૭॥

કુજશુક્રજ્ઞેન્દ્વર્કજ્ઞશુક્રકુજજીવસૌરિયમગુરવઃ ।
મે(ભે)ષા નવાંશકાનામજમકરતુલાકુલીરાદ્યાઃ ॥ ૮॥

સ્વગૃહાદ્ દ્વાદશભાગાઃ દ્રેષ્કાણાઃ પ્રથમપઞ્ચનવપાનામ્ ।
હોરે વિષમેઽર્કેન્દ્વોઃ સમરાશૌ ચન્દ્રતીક્ષ્ણાંશોઃ ॥ ૯॥

કુજયમજીવજ્ઞસિતાઃ પઞ્ચેન્દ્રિયવસુમુનીન્દ્રિયાંશાનામ્ ।
વિષમેષુ સમર્ક્ષેષૂત્ક્રમેણ ત્રિંશાંશપાઃ કલ્પ્યાઃ ॥ ૧૦॥

નૃચતુષ્પદકીટાપ્યાબલિનઃ પ્રાગ્દક્ષિણાપરોત્તરગાઃ ।
સન્ધ્યાદ્યુરાત્રિબલિનઃ કીટા નૃચતુષ્પદાશ્ચૈવમ્ ॥ ૧૧॥

મેષવૃષધન્વિસિંહાશ્ચતુષ્પદા મકરપૂર્વભાગશ્ચ ।
કીટઃ કર્કટરાશિઃ સરીસૃપો વૃશ્ચિકઃ કથિતઃ ॥ ૧૨॥

મકરસ્ય પશ્ચિમાર્ધં જ્ઞેયો મીનશ્ચ જલચરઃ ખ્યાતઃ ।
મિથુનતુલાઘટકન્યા દ્વિપદાખ્યા ધન્વિપૂર્વભાગશ્ચ ॥ ૧૩॥

અધિપયુતો દૃષ્ટો વા બુધજીવયુતેક્ષિતશ્ચ યો રાશિઃ ।
સ ભવતિ બલવાન્ન યદા યુક્તો દૃષ્ટોઽપિ વા શેષૈઃ ॥ ૧૪॥

તનુધનસહજસુહૃત્-સુતરિપુજાયામૃત્યુધર્મકર્માખ્યાઃ ।
વ્યય ઇતિ લગ્નાદ્ભાવાશ્ચતુરસ્રાખ્યેઽષ્ટમચતુર્થે ॥ ૧૫॥

પાતાલહિબુકવેશ્મસુખબન્ધુસંજ્ઞાશ્ચતુર્થભાવસ્ય ।
નવ-પઞ્ચમે ત્રિકોણે નવમર્ક્ષં ત્રિત્રિકોણં ચ ॥ ૧૬॥

ધીઃ પઞ્ચમં તૃતીયં દુશ્ચિક્યં સપ્તમં તુ યામિત્રમ્ ।
દ્યૂનં દ્યુનં ચ તદ્વચ્છિદ્રમષ્ટમં દ્વાદશં રિષ્ફમ્ ॥ ૧૭॥

કેન્દ્રચતુષ્ટયકણ્ટકલગ્નાઽસ્તદશમચતુર્થાનામ્ ।
સંજ્ઞા પરતઃ પણફરમાપોક્લીમં ચ તત્પરતઃ ॥ ૧૮॥

ત્રિષડેકાદશદશમાન્યુપચયભવનાન્યતોઽન્યથાઽન્યાનિ ।
વર્ગોત્તમા નવાંશાશ્ચરાદિષુ પ્રથમમધ્યાન્ત્યાઃ ॥ ૧૯॥

મેષાદ્યાશ્ચત્વારઃ સધન્વિમકરાઃ ક્ષપાબલા જ્ઞેયાઃ ।
પૃષ્ઠોદયા વિમિથુનાઃ શિરસાન્યે હ્યુભયતો મીનઃ ॥ ૨૦॥

અજવૃષમૃગાઙ્ગનાકર્કિમીનવણિજાંશકેષ્વિનાદ્યુચ્ચાઃ ।
દશશિખ્યષ્ટાવિંશતિતિથીન્દ્રિયત્રિનવવિંશેષુ ॥ ૨૧॥

ઉચ્ચાન્નીચં સપ્તમમર્કાદીનાં ત્રિકોણસંજ્ઞાનિ ।
સિંહવૃષાજપ્રમદા-કાર્મુક ભૃતૌલિકુમ્ભધરાઃ ॥ ૨૨॥

ગૃહહોરાદ્રેષ્કાણા નવભાગો દ્વાદશાંશકસ્ત્રિંશઃ ।
વર્ગઃ પ્રત્યેતવ્યો ગ્રહસ્ય યો યસ્ય નિર્દિષ્ટઃ ॥ ૨૩॥

ઇતિ શ્રીવરાહમિહિરવિરચિત લઘુજાતકે રાશિપ્રભેદાધ્યાયઃ પ્રથમઃ ॥

## અથ ગ્રહબલાધ્યાયઃ ॥ ૨॥

આત્મા રવિઃ શીતકરસ્તુ ચેતઃ
સત્ત્વં ધરાજઃ શશિજોઽથ વાણી ।
જ્ઞાનં સુખં ચેન્દ્રગુરુર્મદશ્ચ
શુક્રઃ શનિઃ કાલનરસ્ય દુઃખમ્ ॥ ૧॥

આત્માદયો ગગનગૈર્બલિભિર્બલવત્તરાઃ ।
દુર્બલૈર્દુર્બલા ઙ્ગેયા વિપરીતઃ શનિઃ સ્મૃતઃ ॥ ૨॥

રાજા રવિઃ શશધરશ્ચ બુધઃ કુમારઃ
સેનાપતિઃ ક્ષિતિસુતઃ સચિવૌ સિતેજ્યૌ ।
ભૃત્યસ્તથા તરણિજઃ સબલા ગ્રહાશ્ચ
કુર્વન્તિ જન્મસમયે નિજમેવ રૂપમ્ ॥ ૩॥

પ્રાચ્યાદીશા રવિસિતકુજરાહુયમેન્દુસૌમ્યવાક્પતયઃ ।

ક્ષીણેન્દ્વર્કયમારાઃ પાપાસ્તૈઃ સંયુતઃ સૌમ્યઃ ॥ ૪॥

ક્લીબપતી બુધસૌરી ચન્દ્રસિતૌ યોષિતાં નૃણાં શેષાઃ ।
ઋગથર્વસામયજુષામધિપા ગુરુસૌમ્યભૌમસિતાઃ ॥ ૫॥

જીવસિતૌ વિપ્રાણાં ક્ષત્રાણાં રવિકુજૌ વિશાં ચન્દ્રઃ ।
શૂદ્રાધિપઃ શશિસુતઃ શનૈશ્ચરઃ સઙ્કરભવાનામ્ ॥ ૬॥

બલવાન્ સ્વગૃહોચ્ચાંશે મિત્રર્ક્ષે વીક્ષિતઃ શુભૈશ્ચાપિ ।
ચન્દ્રસિતૌ સ્ત્રીક્ષેત્રે પુરુષક્ષેત્રોપગાઃ શેષાઃ ॥ ૭॥

પ્રાચ્યાદિષુ જીવબુધૌ સૂર્યારૌ ભાસ્કરિઃ શશાઙ્કસિતૌ ।
ઉદગયને શશિસૂર્યૌ વક્રેઽન્યે સ્નિગ્ધવિપુલાશ્ચ ॥ ૮॥

અહનિ સિતાર્કસુરેજ્યા દ્યુનિશં જ્ઞો નક્તમિન્દુકુજસૌરાઃ ।
સ્વદિનાદિષ્વશુભશુભા બહુલોત્તરપક્ષયોર્બલિનઃ ॥ ૯॥

મન્દારસૌમ્યવાક્પતિસિતચન્દ્રાર્કા યથોત્તરં બલિનઃ ।
નૈસર્ગિકબલમેતત્ બલસામ્યેઽસ્માદ્ બલાધિકતા ॥ ૧૦॥

મિત્રક્ષેત્રે સ્વોચ્ચે સ્વહોરાયાં સ્વભવનત્રિકોણે ચ ।
સ્વદ્રેષ્કાણે સ્વાંશે સ્વદિને ચ બલાન્વિતાઃ સર્વે ॥ ૧૧॥

દશમ-તૃતીયે નવ-પઞ્ચમે ચતુર્થાષ્ટમે કલત્રં ચ ।
પશ્યન્તિ પાદવૃદ્ધ્યા ફલાનિ ચૈવં પ્રયચ્છન્તિ ॥ ૧૨॥

પૂર્ણમ્પશ્યતિ રવિજસ્તૃતીયદશમે ત્રિકોણમપિ જીવઃ ।
ચતુરસ્રં ભૂમિસુતઃ સિતાર્કબુધહિમકરાઃ કલત્રં ચ ॥ ૧૩॥

॥ ઇતિ શ્રીવરાહમિહિરવિરચિત લઘુજાતકે ગ્રહભેદાધ્યાયઃ દ્વિતીયઃ ॥

## અથ ગ્રહમૈત્રીવિવેકાધ્યાયઃ ॥ ૩॥

મિત્રાણ્યર્કાજ્જીવો જ્ઞગુરૂ જ્ઞસિતૌ વિભાસ્કરા વિકુજાઃ ।
વીન્દ્વર્કા વિકુજરવીન્દવશ્ચ કેષાઞ્ચિદરયોઽન્યે ॥ ૧॥

શત્રૂ મન્દસિતૌ સમશ્ચ શશિજો મિત્રાણિ શેષા રવે-
સ્તીક્ષ્ણાંશુર્હિમરશ્મિજશ્ચ સુહૃદૌ શેષાઃ સમાઃ શીતગોઃ ।
જીવેન્દૂષ્ણકરાઃ કુજસ્ય સુહૃદો જ્ઞોઽરિઃ સિતાર્કી સમૌ
મિત્રે સૂર્યસિતૌ બુધસ્ય હિમગુઃ શત્રુઃ સમાશ્ચાપરે ॥ ૨॥

સૂરેઃ સૌમ્યસિતાવરી રવિસુતો મધ્યોઽપરે ત્વન્યથા
સૌમ્યાર્કી સુહૃદૌ સમૌ કુજગુરૂ શુક્રસ્ય શેષાવરી
શુક્રગયૌ સુહૃદૌ સમઃ સુરગુરુઃ સૌરેસ્તથાન્યેઽરય-
સ્તત્કાલે ચ દશાઽઽયબન્ધુસહજસ્વાઽન્ત્યેષુ મિત્રં સ્થિતઃ ॥ ૩॥

મૂલત્રિકોણષષ્ઠત્રિકોણનિધનૈકરાશિસપ્તમગાઃ ।
એકૈકસ્ય યથા સમ્ભવન્તિ તાત્કાલિકા રિપવઃ ॥ ૪॥

મિત્રમુદાસીનોઽરિર્વ્યાખ્યાતા યે નિસર્ગભાવેન ।
તેઽધિસુહૃન્મિત્રસમાસ્તત્કાલમુપસ્થિતાશ્ચિન્ત્યાઃ ॥ ૫॥

॥ ઇતિ શ્રીવરાહમિહિરવિરચિત લઘુજાતકે ગ્રહમૈત્રીવિવેકાધ્યાયઃ તૃતીયઃ ॥

## અથ ગ્રહસ્વરૂપાધ્યાયઃ ॥ ૪॥

સૂર્યસ્વરૂપમ્ -
ચતુરસ્રો નાત્યુચ્ચસ્તનુકેશઃ પૈત્તિકોઽસ્થિસારશ્ચ ।
શૂરો મધુપિઙ્ગાક્ષો રક્તશ્યામઃ પૃથુશ્ચાર્કઃ ॥ ૧॥

ચન્દ્રસ્વરૂપમ્ -
સ્વચ્છઃ પ્રાજ્ઞો ગૌરશ્ચપલઃ કફવાતિકો રુધિરસારઃ ।
મૃદુવાગ્ ઘૃણી પ્રિયસખસ્તનુવૃત્તશ્ચન્દ્રમાઃ પ્રાંશુઃ ॥ ૨॥

ભૌમસ્વરૂપં
હિંસ્રો હ્રસ્વસ્તરુણઃ પિઙ્ગાક્ષઃ પૈત્તિકો દુરાધર્ષઃ ।
ચપલઃ સરક્તગૌરો મજ્જાસારશ્ચ માહેયઃ ॥ ૩॥

બુધસ્વરૂપં
મધ્યમરૂપઃ પ્રિયવાગ્ દૂર્વાશ્યામઃ શિરાતતો નિપુણઃ ।
ત્વક્સારસ્ત્રિસ્થૂણઃ સતતં હૃષ્ટસ્તુ ચન્દ્રસુતઃ ॥ ૪॥

ગુરુસ્વરૂપમ્ -
મધુનિભનયનો મતિમાનુપચિતમાંસઃ કફાત્મકો ગૌરઃ ।
ઈષત્પિઙ્ગલકેશો મેદઃસારો ગુરુર્દીર્ઘશ્ચ ॥ ૫॥

શુક્રસ્વરૂપં

શ્યામો વિકુષ્ટપર્વા કુટિલાસિતમૂર્ધજઃ સુખી કાન્તઃ ।
કફવાતિકો મધુરવાગ્ભૃગુપુત્રઃ શુક્રસારશ્ચ ॥ ૬॥

શનિસ્વરૂપમ્ -
કૃશદીર્ઘઃ પિઙ્ગાક્ષઃ કૃષ્ણઃ પિશુનોઽનિલપ્રકૃતિઃ ।
સ્થૂલનખદન્તરોમા શનૈશ્ચરો સ્નાયુસારશ્ચ ॥ ૭॥

સ્વરૂપપ્રયોજનં
એતે ગ્રહા બલિષ્ઠાઃ પ્રસૂતિકાલે નૃણાં સ્વમૂર્તિસમમ્ ।
કુર્યુર્દેહં નિયતં બહવશ્ચ સમાગતા મિશ્રમ્ ॥ ૮॥

॥ ઇતિ શ્રીવરાહમિહિરવિરચિત લઘુજાતકે ગ્રહસ્વરૂપાધ્યાયશ્ચતુર્થઃ ॥

## અથ ગર્ભાધાનાધ્યાયઃ ॥ ૫॥

આધાનેઽસ્તગૃહં યત્તચ્છીલો મૈથુને પુમાન્ ભવતિ ।
સાયાસમસદ્યુતવીક્ષિતે વિદગ્ધં શુભૈરસ્તે ॥ ૧॥

સૌરાંશેઽબ્જાંશે વા ચન્દ્રઃ સૌરાન્વિતોઽથ હિબુકે વા ।
શાન્તો દીપો જન્મન્યાધાને ચેન્ન રવિદૃષ્ટઃ ॥ ૨॥

ચન્દ્રો યાવત્સઙ્ખ્યે દ્વાદશભાગે નિષેકસમયે સ્યાત્ ।
તસ્માત્ તાવતિ રાશૌ જન્મેન્દૌ સમ્ભવે માસિ ॥ ૩॥

ઉદયતિ મૃદુભાંશે સપ્તમસ્થે ચ મન્દે
યદિ ભવતિ નિષેકઃ સૂતિમબ્દત્રયેણ ।
શશિનિ તુ વિધિરેષ દ્વાદશેઽબ્દે પ્રકુર્યા-
ન્નિગદિતમિહ ચિન્ત્યં સૂતિકાલેઽપિ યુક્ત્યા ॥ ૪॥

યમવક્રૌ દ્યૂનેઽર્કાત્ પુંસો રોગપ્રદૌ સ્ત્રિયશ્ચન્દ્રાત્ ।
તન્મધ્યગયોર્મૃત્યુસ્તદેકયુતદૃષ્ટયોશ્ચૈવમ્ ॥ ૫॥

કલલઘનાવયવાસ્થિત્વગ્રોમસ્મૃતિસમુદ્ભવાઃ ક્રમશઃ ।
માસેષુ શુક્રકુજજીવસૂર્યચન્દ્રાર્કિસૌમ્યાનામ્ ॥ ૬॥

અશનોદ્વેગપ્રસવાઃ પરતો લગ્નેશચન્દ્રસૂર્યાણામ્ ।
કલુષૈઃ પીડા પતનં નિપીડિતૈર્નિર્મલૈઃ પુષ્ટિઃ ॥ ૭॥

બલયુક્તૌ સ્વગૃહાંશેષ્વર્કસિતાવુપચયર્ક્ષગૌ પુંસામ્ ।

સ્ત્રીણાં વા કુજચન્દ્રૌ યદા તદા ગર્ભસમ્ભવો ભવતિ ॥ ૮॥

લગ્ને બલિનિ ગુરૌ વા નવપઞ્ચમસંસ્થિતેઽપિ વા ભવતિ ।
યોગા હતબીજાનામફલા વીણેવ બધિરાણામ્ ॥ ૯॥

વિષમર્ક્ષે વિષમાંશે સંસ્થિતાશ્ચ ગુરુશશાઙ્કલગ્નાર્કાઃ ।
પુઞ્જન્મકરાઃ સમભેષુ યોષિતાં સમનવાંશગતાઃ ॥ ૧૦॥

બલિનૌ વિષમેઽર્કગુરૂ નરં સ્ત્રિયં સમગૃહે કુજેન્દુસિતાઃ ।
યમલં દ્વિશરીરાંશેષ્વિન્દુજદૃષ્ટાઃ સ્વપક્ષસમમ્ ॥ ૧૧॥

લગ્નાદ્વિષમોપગતઃ શનૈશ્ચરઃ પુત્રજન્મદો ભવતિ ।
નિગદિતયોગબલાબલમવલોક્ય વિનિશ્ચયો વાચ્યઃ ॥ ૧૨॥

॥ ઇતિ શ્રીવરાહમિહિરવિરચિત લઘુજાતકે ગર્ભાધાનાધ્યાયઃ પઞ્ચમઃ ॥

## અથ સૂતિકાધ્યાયઃ ॥ ૬॥

ગુરુશશિરવયઃ સત્ત્વં રજઃ સિતજ્ઞૌ તમોઽર્કસુતભૌમૌ ।
એતેઽન્તરાત્મનિ સ્વાં પ્રકૃતિં જન્તોઃ પ્રયચ્છન્તિ ॥ ૧॥

સત્ત્વં રજસ્તમો વા ત્રિંશાંશે યસ્ય ભાસ્કરસ્તાદૃક્ ।
બલિનઃ સદૃશી મૂર્તિર્બુધ્વા વા જાતિકુલદેશાન્ ॥ ૨॥

પૂર્વવિલગ્ને યાદૃગ્ નવ ભાગસ્તાદૃશી ભવતિ મૂર્તિઃ ।
યો વા ગ્રહો બલિષ્ઠસ્તત્કાલે તાદૃશી વાચ્યા ॥ ૩॥

ચન્દ્રે લગ્નમપશ્યતિ મધ્યે વા શુક્રસૌમ્યયોશ્ચન્દ્રે ।
જન્મ પરોક્ષસ્ય પિતુર્યમોદયે વા કુજે વાઽસ્તે ॥ ૪॥

પાપયુતોઽર્કઃ સેન્દુઃ પશ્યતિ હોરાં ન ચન્દ્રમપિ જીવઃ ।
પશ્યતિ સાર્કં નેન્દું યદિ જીવો વા પરૈર્જાતઃ ॥ ૫॥

દ્વારં વાસ્તુનિ કેન્દ્રોપગાદ્ ગ્રહાદસતિ વા વિલગ્નર્ક્ષાત્ ।
દીપોઽર્કાદુદયાદ્ વર્તિરિન્દુતઃ સ્નેહનિર્દેશઃ ॥ ૬॥

અદૃઢં નવમથ દગ્ધં ચિત્રં સુદૃઢં મનોરમં જીર્ણમ્ ।
ગૃહમર્કાદિકવીર્યાત્ પતિભવનં સન્નિકૃષ્ટૈશ્ચ ॥ ૭॥

ગુરુરુચ્ચો દશમસ્થો દ્વિત્રિચતુર્ભૂમિકં કરોતિ ગૃહમ્ ।

ધનુષિ સબલસ્ત્રિશાલં દ્વિશાલમન્યેષુ યમલેષુ ॥ ૮॥

ષટ્ત્રિનવાન્ત્યાઃ પાદાઃ ખટ્વાઙ્ગાન્યન્તરાલભવનાનિ ।
વિનતત્વં યમલર્ક્ષૈઃ ક્રૂરૈસ્તત્તુલ્ય ઉપઘાતઃ ॥ ૯॥

છાગે સિંહે વૃષે લગ્ને તત્સ્થે સૌરેઽથવા કુજે ।
રાશ્યંશસદૃશે ગાત્રે જાયતે નાલવેષ્ટિતઃ ॥ ૧૦॥

જ્ઞેયાનિ તામ્રમણિહેમશુક્તિરૌપ્યાણિ મૌક્તિકં લોહમ્ ।
અર્કાદ્યૈર્બલવદ્ભિઃ સ્વસ્થાને હેમ જીવેઽપિ ॥ ૧૧॥

શશિલગ્નાન્તરસંસ્થગ્રહતુલ્યાશ્ચોપસૂતિકા જ્ઞેયાઃ ।
ઉદગર્ધેઽભ્યન્તરગા બાહ્યાશ્ચક્રસ્ય દૃશ્યેઽર્ધે ॥ ૧૨॥

॥ ઇતિ શ્રીવરાહમિહિરવિરચિત લઘુજાતકે સૂતિકાધ્યાયઃ ષષ્ઠઃ ॥

## અથ અરિષ્ટાધ્યાયઃ ॥ ૭॥

ષષ્ઠેઽષ્ટમેઽપિ ચન્દ્રઃ સદ્યો મરણાય પાપસન્દૃષ્ટઃ ।
અષ્ટાભિઃ શુભદૃષ્ટો વર્ષૈર્મિશ્રૈસ્તદર્ધેન ॥ ૧॥

શશિવત્સૌમ્યાઃ પાપૈર્વક્રિભિરવલોકિતા ન શુભદૃષ્ટાઃ ।
માસેન મરણદાઃ સ્યુઃ પાપજિતો લગ્નપશ્ચાસ્તે ॥ ૨॥

રાશ્યન્તસ્થૈઃ પાપૈઃ સન્ધ્યાયાં હિમમયૂખહોરાયામ્ ।
મૃત્યુઃ પ્રત્યેકસ્થૈઃ કેન્દ્રેષુ શશાઙ્કપાપૈશ્ચ ॥ ૩॥

ચક્રપ્રાક્પશ્ચાર્ધે પાપશુભૈઃ કીટભોદયે મૃત્યુઃ ।
નિધનચતુષ્ટયગૈર્વા ક્રૂરૈઃ ક્ષીણે શશિન્યુદયે ॥ ૪॥

સપ્તાષ્ટાન્ત્યોદયગે શશિનિ સપાપે શુભેક્ષણવિયુક્તે ।
ન ચ કણ્ટકેઽસ્તિ કશ્ચિચ્છુભસ્તદા મૃત્યુરાદેશ્યઃ ॥ ૫॥

ચતુરસ્રે સપ્તમગઃ પાપાન્તસ્થઃ શશી મરણદાતા ।
ઉદયગતો વા ચન્દ્રઃ સપ્તમરાશિસ્થિતૈઃ પાપૈઃ ॥ ૬॥

ક્ષીણેન્દૌ દ્વાદશગે લગ્નાષ્ટમરાશિસંસ્થિતૈઃ પાપૈઃ ।
સૌમ્યરહિતે ચ કેન્દ્રે સદ્યો મૃત્યુર્વિનિર્દેશ્યઃ ॥ ૭॥

સોપપ્લવે શશાઙ્કે સક્રૂરે લગ્નગે કુજેઽષ્ટમગે ।

મૃત્યુર્માત્રા સાર્ધં ચન્દ્રવદર્કે ચ શસ્ત્રેણ ॥ ૮॥

લગ્ન-દ્વાદશ-નવમાઽષ્ટમસંસ્થૈશ્ચન્દ્ર-સૌરિ-સૂર્યાઽઽરૈઃ ।
જાતસ્ય ભવતિ મરણં યદિ ન બલયુતઃ પતિર્વચસામ્ ॥ ૯॥

સુતમદનનવાન્ત્યલગ્નરન્ધ્રેષ્વશુભયુતો મરણાય શીતરશ્મિઃ ।
ભૃગુસુતશશિપુત્રદેવપૂજ્યૈર્યદિ બલિભિર્ન યુતોઽવલોકિતો વા ॥ ૧૦॥

યોગે સ્થાનં ગતવતિ બલિનશ્ચન્દ્રે સ્વં વા તનુગૃહમથવા ।
પાપૈર્દૃષ્ટે બલવતિ મરણં વર્ષસ્યાન્તઃ કિલ મુનિગદિતમ્ ॥ ૧૧॥

॥ ઇતિ શ્રીવરાહમિહિરવિરચિત લઘુજાતકે અરિષ્ટાધ્યાયઃ સપ્તમઃ ॥

## અથ અરિષ્ટભઙ્ગાધ્યાયઃ ॥ ૮॥

સર્વાનિમાનતિબલઃ સ્ફુરદંશુજાલો
લગ્નસ્થિતઃ પ્રશમયેત્ સુરરાજમન્ત્રી ।
એકો બહૂનિ દુરિતાનિ સુદુસ્તરાણિ
ભક્ત્યા પ્રયુક્ત ઇવ શૂલધરપ્રણામઃ ॥ ૧॥

લગ્નાધિપોઽતિબલવાનશુભૈરદૃષ્ટઃ
કેન્દ્રસ્થિતૈઃ શુભખગૈરવલોક્યમાનઃ ।
મૃત્યું વિધૂય વિદધાતિ શુદીર્ઘમાયુઃ
સાર્ધં ગુણૈર્બહુભિરૂર્જિતયા ચ લક્ષ્મ્યા ॥ ૨॥

લગ્નાદષ્ટમવર્ત્યપિ બુધગુરુભાર્ગવદૃકાણગશ્ચન્દ્રઃ ।
મૃત્યું પ્રાપ્તમપિ નરં પરિરક્ષત્યેવ નિર્વ્યાજમ્ ॥ ૩॥

ચન્દ્રઃ સમ્પૂર્ણતનુઃ સૌમ્યર્ક્ષગતઃ સ્થિતઃ શુભસ્યાન્તઃ ।
પ્રકરોતિ રિષ્ટભઙ્ગં વિશેષતઃ શુક્રસન્દૃષ્ટઃ ॥ ૪॥

બુધભાર્ગવજીવાનામેકતમઃ કેન્દ્રમાગતો બલવાન્ ।
ક્રૂરસહાયો યદ્યપિ સદ્યો રિષ્ટસ્ય ભઙ્ગાય ॥ ૫॥

રિપુભવનગતોઽપિ શશી ગુરુસિતચન્દ્રાત્મજદૃકાણસ્થઃ ।
ગરુડ ઇવ ભોગિદષ્ટં પરિરક્ષત્યેવ નિર્વ્યાજમ્ ॥ ૬॥

સૌમ્યદ્વયમધ્યગતઃ સમ્પૂર્ણઃ સ્નિગ્ધમણ્ડલઃ શશભૃત્ ।
નિઃશેષારિષ્ટહન્તા ભુજઙ્ગલોકસ્ય ગરુડ ઇવ ॥ ૭॥

શશભૃતિ પૂર્ણશરીરે શુક્લે પક્ષે નિશાભવે કાલે ।
રિપુનિધનસ્થે રિષ્ટં પ્રભવતિ નૈવાત્ર જાતસ્ય ॥ ૮॥

પ્રસ્ફુરિતકિરણજાલે સ્નિગ્ધામલમણ્ડલે બલોપેતે ।
સુરમન્ત્રિણિ કેન્દ્રગતે સર્વારિષ્ટં શમં યાતિ ॥ ૯॥

સૌમ્યભવનોપયાતાઃ સૌમ્યાંશકગાઃ સૌમ્યદૃક્કાણસ્થહાઃ ।
ગુરુચન્દ્રકાબ્યશશિજાઃ સર્વેઽરિષ્ટસ્ય હન્તારઃ ॥ ૧૦॥

ચન્દ્રાધ્યાસિતરાશેરધિપઃ કેન્દ્રે શુભગ્રહો વાપિ ।
પ્રશમયતિ રિષ્ટયોગં પાપાનિ યથા હરિસ્મરણમ્ ॥ ૧૧॥

પાપાઃ યદિ શુભવર્ગે સૌમ્યૈર્દૃષ્ટાઃ શુભેશવર્ગસ્થૈઃ ।
નિઘ્નન્તિ તદા રિષ્ટં પતિં વિરક્તા યથા યુવતિઃ ॥ ૧૨॥

રાહુસ્ત્રિષષ્ઠલાભે લગ્નાત્ સૌમ્યૈર્નિરીક્ષિતઃ સદ્યઃ ।
નાશયતિ સર્વદુરિતં મારુત ઇવ તૂલસઙ્ઘાતમ્ ॥ ૧૩॥

શીર્ષોદયેષુ રાશિષુ સર્વે ગગનાધિવાસિનઃ સૂતૌ ।
પ્રકૃતિસ્થગ્ચારિષ્ટં વિલીયતે ઘૃતમિવાગ્નિસ્થમ્ ॥ ૧૪॥

તત્કાલે યદિ વિજયી શુભગ્રહઃ શુભનિરીક્ષિતોઽવશ્યમ્ ।
નાશયતિ સર્વારિષ્ટં મારુત ઇવ પાદપાન્ પ્રબલઃ ॥ ૧૫॥

પક્ષે સિતે ભવતિ જન્મ યદિ ક્ષપાયાં
કૃષ્ણે તથાઽહનિ શુભાશુભઽદૃશ્યમાનઃ ।
તં ચન્દ્રમા રિપુવિનાશગતોઽપિ યત્ના-
દાપત્સુ રક્ષતિ પિતેવ શિશું ન હન્તિ ॥ ૧૬॥

॥ ઇતિ શ્રીવરાહમિહિરવિરચિત લઘુજાતકે અરિષ્ટભઙ્ગાધ્યાયઃ અષ્ટમઃ ॥

## અથ આયુર્દાયાધ્યાયઃ ॥ ૯॥

રાશ્યંશકલા ગુણિતા દ્વાદશનવભિર્ગ્રહસ્ય ભગણેભ્યઃ ।
દ્વાદશહૃતાવશેષેઽબ્દમાસદિનનાડિકાઃ ક્રમશઃ ॥ ૧॥

હોરાદાયોઽપ્યેવં બલયુક્તાઽન્યાનિ રાશિતુલ્યાનિ ।
વર્ષાણિ સંપ્રયચ્છત્યનુપાતાચ્ચાંશકાદિફલમ્ ॥ ૨॥

વર્ગોત્તમસ્વરાશિદ્રેષ્કાણનવાંશકે સકૃદ્-દ્વિગુણં (દ્વિગુણમ્) ।

વક્રોચ્ચયોસ્ત્રિગુણિતં દ્વિત્રિગુણત્વે સકૃત્ ત્રિગુણમ્ ॥ ૩॥

ત્ર્યંશમવક્રો રિપુભે નીચેઽર્ધં સૂર્યલુપ્તકિરણશ્ચ ।
ક્ષપયતિ સ્વાયુર્દાયાન્નાસ્તં યાતૌ રવિજશુક્રૌ ॥ ૪॥

સર્વાર્ધત્રિચતુર્થેન્દ્રિયર્તુભાગાન્ વ્યયાદ્ધરન્ત્યશુભાઃ ।
સન્તોઽર્ધમતો વામં બલવાનેકર્ક્ષગેષ્વેકઃ ॥ ૫॥

॥ ઇતિ શ્રીવરાહમિહિરવિરચિત લઘુજાતકે આયુર્દાયાધ્યાયઃ નવમઃ ॥

## અથ દશાન્તર્દશાધ્યાયઃ ॥ ૧૦॥

શોધ્યક્ષેપવિશુદ્ધઃ કાલો યો યેન જીવિતે દત્તઃ ।
સ વિચિન્ત્યા તસ્ય દશા સ્વદશાસુ ફલપ્રદાઃ સર્વે ॥ ૧॥

લગ્નાર્કશશાઙ્કાનાં યો બલવાંસ્તદ્દશા ભવેત્ પ્રથમા ।
તત્કેન્દ્રપણફરાપોક્લિમગતાનાં બલાચ્છેષાઃ ॥ ૨॥

મિત્રોચ્ચસ્વગૃહાંશોપગતાનાં શોભના દશાઃ સર્વાઃ ।
સ્વોચ્ચાભિલાષિણામપિ ન તુ કથિતવિપર્યયસ્થાનામ્ ॥ ૩॥

હોરાદશા દૃકાણૈઃ પૂજિતમધ્યાધમા ચરે ક્રમશઃ ।
દ્વિશરીરે વિપરીતા સ્થિરે તુ પાપેષ્ટમધ્યફલા ॥ ૪॥

એકર્ક્ષેઽર્ધં ત્ર્યંશં ત્રિકોણયોઃ સપ્તમે તુ સપ્તાંશમ્ ।
ચતુરસ્ર(સ્ત્ર)યોસ્તુ પાદં પાચયતિ ગતો ગ્રહઃ સ્વગુણૈઃ ॥ ૫॥

ભાગાઃ સદૃશચ્છેદૈર્વિવર્જિતાઃ સંયુતા દશાચ્છેદાઃ ।
પ્રત્યંશા ગુણકારાઃ પૃથક્ પૃથક્ ચાન્તર્દશાસ્તાઃ ॥ ૬॥

॥ ઇતિ શ્રીવરાહમિહિરવિરચિત લઘુજાતકે દશાન્તર્દશાધ્યાયઃ દશમઃ ॥

## અથ અષ્ટકવર્ગાધ્યાયઃ ॥ ૧૧॥

કેન્દ્રાયાષ્ટદ્વિનવસ્વર્કઃ સ્વાદાર્કિભૌમતશ્ચ શુભઃ ।
ષટ્સપ્તાન્ત્યેષુ સિતાત્ ષડાયધીધર્મગો જીવાત્ ॥ ૧॥

ઉપચયગોઽર્કશ્ચન્દ્રાદુપચયનવમાન્ત્યધીગતઃ સૌમ્યાત્ ।
લગ્નાદુપચયબન્ધુવ્યયસ્થિતઃ શોભનઃ પ્રોક્તઃ ॥ ૨॥

શશ્યુપચયેષુ લગ્નાત્સાદ્યમુનિઃ સ્વાત્કુજાત્વનવધીષુ ।
સૂર્યત્ સાષ્ટસ્મરગસ્ત્રિષડાયસુતેષુ સૂર્યસુતાત્ ॥ ૩॥

જ્ઞાત્ કેન્દ્રત્રિસુતાયાષ્ટગો ગુરોર્વ્યયાયમૃત્યુકેન્દ્રેષુ ।
ત્રિચતુઃસુતનવદશમદ્યુનાયગશ્ચન્દ્રમાઃ શુક્રાત્ ॥ ૪॥

ભૌમઃ સ્વાદાયસ્વાષ્ટકેન્દ્રગસ્ત્ર્યાયષટ્સુતેષુ બુધાત્ ।
જીવાદ્ દશાય-શત્રુ-વ્યયેષ્વિનાદુપચય-સુતેષુ ॥ ૫॥

ઉદયાદુપચયતનુષુ ત્રિષડાયેષ્વિન્દુતઃ સમો દશમઃ ।
ભૃગુતોન્ત્યષડષ્ટાયેષ્વસિતાત્ કેન્દ્રાયનવવસુષુ ॥ ૬॥

સૌમ્યોઽન્ત્યષણ્ણવાયાત્મજેષ્વિનાત્ સ્વાત્ ત્રિતનુદશયુતેષુ ।
ચન્દ્રાદ્વિરિપુદશાયાષ્ટસુખગતઃ સ્વાત્ સાદિષુ વિલગ્નાત્ ॥ ૭॥

પ્રથમસુખાયદ્વિનિધનધર્મેષુ સિતાત્ ત્રિધીસમેતેષુ ।
સાશાસ્મરેષુ સૌરારયોર્વ્યયાયરિપુવસુષુ ગુરોઃ ॥ ૮॥

જીવો ભૌમાદ્ દ્વયાયાષ્ટકેન્દ્રગોઽર્કાત્ સધર્મસહજેષુ ।
સ્વાત્ સત્રિકેષુ શુક્રાન્નવદશલાભસ્વધીરિપુષુ ॥ ૯॥

શશિનઃ સ્વરત્રિકોણાર્થલાભગસ્ત્રિરિપુધીવ્યયેષુ યમાત્ ।
નવદિક્સુખાધ્યધીસ્વાયશત્રુષુ જ્ઞાત્ સકામગો લગ્નાત્ ॥ ૧૦॥

શુક્રો લગ્નાદાસુતનવાષ્ટલાભેષુ સવ્યયશ્ચન્દ્રાત્ ।
સ્વાત્ સદિગસિતાત્ ત્રિસુખાત્મજાષ્ટદિગ્ધર્મલાભેષુ ॥ ૧૧॥

વસ્વન્ત્યાયેષ્વર્કાન્નવદિગ્લાભાષ્ટધીસ્થિતો જીવાત્ ।
જ્ઞાત્ ત્રિસુતનવાયારિષ્વાયસુતાપોઽક્લિમેષુ કુજાત્ ॥ ૧૨॥

સ્વાત્ સૌરિસ્ત્રિસુતાયારિગઃ કુજાદન્ત્યકર્મસહિતેષુ ।
સ્વાયાષ્ટકેન્દ્રગોઽર્કાચ્છુક્રાત્ ષષ્ઠાન્ત્યલાભેષુ ॥ ૧૩॥

ત્રિષડાયગઃ શશાङ્કાદુદયાત્ સસુખાદ્યકર્મગોઽથ ગુરોઃ ।
સુતષટ્વ્યયાયગો જ્ઞાત્ વ્યયાયરિપુદિઙ્નવાષ્ટસ્થઃ ॥ ૧૪॥

સ્થાનેષ્વેતેષુ શુભાઃ શેષેષ્વહિતા ભવન્તિ ચાષ્ટાનામ્ ।
અશુભશુભવિશેષફલં ગ્રહાઃ પ્રયચ્છન્તિ ચારગતાઃ ॥ ૧૫॥

॥ ઇતિ શ્રીવરાહમિહિરવિરચિત લઘુજાતકે અષ્ટકવર્ગાધ્યાયઃ એકાદશઃ ॥

# અથ પ્રકીર્ણાધ્યાયઃ ॥ ૧૨॥

રવિવર્જ્યં દ્વાદશગૈરનફા ચન્દ્રાદ્દ્વિતીયગૈઃ સુનફા ।
ઉભયસ્થિતૈર્દુરુધરા કેમદ્રુમસંજ્ઞકોઽતોઽન્યઃ ॥ ૧॥

સચ્છીલં વિષયસુખાન્વિતં પ્રભું ખ્યાતિયુક્તમનફાયામ્ ।
સુનફાયાં ધીધનકીર્તિયુક્તમાત્માર્જિતૈશ્વર્યામ્ ॥ ૨॥

બહુભૃત્યકુટુમ્બારમ્ભં સુખભોગાન્વિતં ચ દૌર્ધરિકે ।
ભૃતકં દુઃખિતમધનં જાતં કેમદ્રુમે વિદ્યાત્ ॥ ૩॥

ભૌમઃ શૂરશ્ચણ્ડો મહાધનો જ્ઞાનવાન્ બુધો નિપુણઃ ।
ઋદ્ધઃ શુક્રઃ સુખિતો ગુરુર્ગુણાઢ્યો નૃપતિપૂજ્યઃ ॥ ૪॥

બહ્વારમ્ભઃ સૌરિર્બહુભૃત્યાઃ પૂજિતો ગુણૈર્વિદ્ધઃ
એષાં ગુણૈઃ સમગુણા જ્ઞેયા યોગોદ્ભવાઃ પુરુષાઃ ॥ ૫॥

સૂર્યાદ્દ્વિતીયમૃક્ષં વેશિસ્થાનં પ્રકીર્તિતં યવનૈઃ ।
તચ્ચેષ્ટગ્રહયુક્તં જન્મનિ ચેષ્ટાસુ ચ વિલગ્નમ્ ॥ ૬॥

યન્ત્રજ્ઞં પાપરતં નિપુણં ક્રૂરં ચ શસ્ત્રવૃત્તિં ચ ।
ધાતુજ્ઞં ચ ક્રમશશ્ચન્દ્રાદિભિરન્વિતઃ સૂર્યઃ ॥ ૭॥

ચન્દ્રોઽઙ્ગારકપૂર્વૈઃ કૂટજ્ઞં પ્રશ્રિતં કુલાભ્યધિકમ્ ।
વસ્ત્રવ્યવહારજ્ઞં ક્રમેણ પૌનર્ભવં ચાપિ ॥ ૮॥

મલ્લો રક્ષોઽન્યસ્ત્રીસક્તો દુઃખાન્વિતઃ કુજો જ્ઞાદ્યૈઃ ।
જ્ઞો જીવાદ્યૈર્ગીતજ્ઞં વાગ્મિનં મહેન્દ્રજાલજ્ઞમ્ ॥ ૯॥

જીવઃ સિતેન બહુગુણમસિતેન સમન્વિતોઽત્ર ઘટકારમ્ ।
સ્ત્રીસ્વં મન્દેન સિતસ્ત્રિભિરપ્યેવં ફલાનિ વદેત્ ॥ ૧૦॥

ચતુરાદિભિરેકસ્થૈઃ પ્રવ્રજ્યાં સ્વાં ગ્રહઃ કરોતિ બલી ।
બહુવીર્યૈસ્તાવત્યઃ પ્રથમા વીર્યાધિકસ્યૈવ ॥ ૧૧॥

તાપસવૃદ્ધશ્રાવકરક્તપટાજીવિભિક્ષુચરકાણામ્ ।
નિર્ગ્રન્થાનાં ચાર્કાત્ પરાજિતૈઃ પ્રચ્યુતિર્બલિભિઃ ॥ ૧૨॥

દિનકરલુપ્તમયૂખૈરદી(વી)ક્ષિતા ભક્તિવાદિનસ્તેષામ્ ।
યાચિતદીક્ષા બલિભિઃ પરાજિતૈરન્યદૃષ્ટૈર્વા ॥ ૧૩॥

## અથ રાશિશીલનિરૂપણં

અસ્થિરવિભૂતિમિત્રં ચલનમટનં સ્ખલિતનિયમમપિ ચરભે ।
સ્થિરભે તદ્વિપરીતં ક્ષમાન્વિતં દીર્ઘસૂત્રં (દીર્ઘસૂન્નં) ચ ॥ ૧॥

દ્વિશરીરે (તદ્વિપરીતં)ત્યાગયુતં કૃતજ્ઞમુત્સાહિતં વિવિધચેષ્ટમ્ ।
ગ્રામ્યારણ્યજલોદ્ભવરાશિષુ વિદ્યાચ્ચ તચ્છીલાન્ ॥ ૨॥

ક્ષેત્રાધિપસન્દૃષ્ટે શશિનિ નૃપસ્તત્સુહૃદ્ભિરપિ ધનવાન્ ।
દ્રેષ્કાણાંશકપૈર્વા પ્રાયઃ સૌમ્યૈઃ શુભં નાઽન્યૈઃ ॥ ૩॥

પુષ્ણન્તિ શુભા ભાવાન્મૂર્ત્યાદીન્ ઘ્નન્તિ સંસ્થિતાઃ પાપાઃ ।
સૌમ્યાઃ ષષ્ઠેઽરિઘ્નાઃ(ષ્ણાઃ) સર્વેઽરિષ્ટા વ્યયાષ્ટમગાઃ ॥ ૪॥

કર્કવૃષાજોપગતે ચન્દ્રે લગ્ને ધની સુરૂપશ્ચ ।
વિકલાઙ્ગજડદરિદ્રાઃ શેષેષુ વિશેષતઃ કૃષ્ણે ॥ ૫॥

વિકલેક્ષનોઽર્કલગ્ને તૈમિરિકોઽજે સ્વભે તુ રાત્ર્યન્ધઃ ।
બુદ્-બુદ્દૃષ્ટિઃ કર્કિણિ કાણો વ્યયગે શશાઙ્કે વા ॥ ૬॥

ઇષ્ટં પાદવિવૃદ્ધ્યા મિત્રસ્વગૃહત્રિકોણતુઙ્ગેષુ ।
રિપુભેઽલ્પં ફલમર્કોપગતસ્ય પાપં શુભં નૈવ ॥ ૭॥

ઇતિ રાશિશીલનિરૂપણમ્ ।

## અથ આશ્રયયોગ નિરૂપણં

તસ્કરભોક્તૃવિચક્ષણધનિનૃપતિનપુંસકાઽભયદરિદ્રાઃ ।
ખ(સ્વ)લપાપોગ્રોત્કૃષ્ટા મેષાદીનાં નવાંશભવાઃ ॥ ૧॥

કુલતુલ્યકુલાધિકબન્ધુમાન્યધનિભોગિનૃપસમનરેન્દ્રાઃ ।
સ્વર્ક્ષગતૈકવિવૃદ્ધ્યા કિઞ્ચિન્ન્યૂના સુહૃદ્ ગૃહગૈઃ ॥ ૨॥

ત્રિપ્રભૃતિભિરુચ્ચસ્થૈર્નૃપવંશભવા ભવન્તિ રાજાનઃ ।
પઞ્ચાદિભિરન્યકુલોદ્ભવાશ્ચ તદ્વત્ત્રિકોણગતૈઃ ॥ ૩॥

નિર્ધનદુઃખિતમૂઢવ્યાધિતબન્ધાભિતમ્રવધભાજઃ ।
એકોત્તરપરિવૃદ્ધ્યા નીચગતૈઃ શત્રુગૃહગૈર્વા ॥ ૪॥

એકોઽપિ નૃપતિજન્મપ્રદો ગ્રહઃ સ્વોચ્ચગઃ સુહૃદ્ દૃષ્ટઃ ।
બલિભિઃ કેન્દ્રોપગતૈસ્ત્રિપ્રભૃતિભિરવનિપાલભવઃ ॥ ૫॥

વર્ગોત્તમગે ચન્દ્રે ચતુરાદ્યૈર્વીક્ષિતે વિલગ્ને વા ।
નૃપજન્મ ભવતિ રાજ્યં નૃપયોગે બલયુતદશાયામ્ ॥ ૬॥

ઉડુપતિયોગસમાગમભશીલસન્દર્શનાનિ ભાવાશ્ચ ।
આશ્રયરાજ્યપ્રભાવાશ્ચાધ્યાયેઽસ્મિન્ ક્રમેણોક્તાઃ ॥ ૭॥

॥ ઇતિ શ્રીવરાહમિહિરવિરચિત લઘુજાતકે પ્રકીર્ણાધ્યાયઃ દ્વાદશઃ ॥

## અથ નાભસયોગાધ્યાયઃ ॥ ૧૩॥

ચર્ભભવનાદિષુ સર્વૈરાશ્રયજા રજ્જુમુસલનલયોગાઃ ।
ઈર્ષ્યુર્માની ધનવાન્ ક્રમેણ કુલવિશ્રુતાઃ સર્વે ॥ ૧॥

દલયોગૌ (સુબ્તિત્લુરિલે તિન્ દે ચોમેન્તરિઉ)
કેન્દ્રત્રયગૈઃ પાપૈઃ શુભૈર્દલાખ્યાવહિશ્ચ માલા ચ ।
સર્પેઽતિદુઃખિતાનાં માલાયાં જન્મ સુખિનાં ચ ॥ ૨॥

દ્વિરનન્તરકેન્દ્રસ્થૈર્ગદાવિલગ્નાસ્તસંસ્થિતૈઃ શકટમ્ ।
ખચતુર્થયોર્વિહઙ્ગઃ શ‌ૃઙ્ગાટકમુદયસુતનવગૈઃ ॥ ૩॥

શ‌ૃઙ્ગાટકતોઽન્યગતૈર્હલમેતેષાં ક્રમાત્ ફલોપનયઃ ।
યજ્વા શકટાજીવી(વો) દૂતશ્ચિરસૌમ્ખ્યભાક્-કૃષિકૃત્ ॥ ૪॥

ક્રૂરૈઃ સુખકર્મસ્થૈઃ સૌમ્યૈરુદયાસ્તસંસ્થિતૈર્વજ્રમ્ ।
યવ ઇતિ તદ્વિપરીતૈર્મિશ્રૈઃ કમલં ચ્યુતૈર્વાપી ॥ ૫॥

લગ્નાદિકણ્ટકેભ્યશ્ચતુર્ગૃહાવસ્થિતૈર્ગ્રહૈર્યોગાઃ ।
યૂપેષુશક્તિદણ્ડા વજ્રાદીનાં ફલાન્યસ્માત્ ॥ ૬॥

આદ્યન્તયોઃ સુખયુતઃ સુખભાઙ્મધ્યે ધનાન્વિતોઽલ્પસુખઃ ।
ત્યાગી હિંસ્રો(સ્રો) ધનવર્જિતઃ પુમાન્ પ્રિયૈર્વિયુક્તશ્ચ ॥ ૭॥

તદ્વત્ સપ્તભસંસ્થૈર્નૌકૂટચ્છત્રકાર્મુકાણિ સ્યુઃ ।
નાવાદ્યૈરપ્યેવં કણ્ટકાન્યસ્થૈઃ સ્મૃતોઽર્ધશશી ॥ ૮॥

એકાન્તરૈર્વિલગ્નાત્ ષડ્-ભવનાવસ્થિતૈર્ગ્રહૈશ્ચક્રમ્ ।

અર્થાચ્ચ તદ્વદુદધિનૌપ્રભૃતિફલાન્યથો ક્રમશઃ ॥ ૯॥

કીર્ત્યા યુક્તોઽનૃતવાક્ સ્વજનહિતઃ શૂરસુભગધનીભૂપાઃ ।
ઇત્યાકૃતિજા યોગા વિંશતિરાત્મગુણૈસ્તેષુ નન્દન્તે ॥ ૧૦॥

એકાદિગૃહોપગતૈરુક્તાન્ યોગાન્ વિહાય સઙ્ખ્યાને ।
ગોલ-યુગ-શૂલ-કેદાર પાશ-દામાખ્ય-વીણાઃ સ્યુઃ ॥ ૧૧॥

દુઃખિતદરિદ્રઘાતકકૃષિકરદુઃશીલપશુપતિનિપુણાનામ્ ।
જન્મ ક્રમેણ સુખિનઃ પરભાગ્યૈસ્સર્વ એવૈતે ॥ ૧૨॥

॥ ઇતિ શ્રીવરાહમિહિરવિરચિત લઘુજાતકે નાભસયોગાધ્યાયસઃ ત્રયોદશઃ ॥

## અથ સ્ત્રીજાતકાધ્યાયઃ ॥ ૧૪॥

સ્ત્રીપુંસોર્જન્મફલં તુલ્યં કિન્ત્વત્ર લગ્નચન્દ્રસ્થમ્ ।
તદ્બલયોગાદ્વપુરાકૃતિશ્ચ સૌભાગ્યમસ્તમયાત્ ॥ ૧॥

યુગ્મર્ક્ષે લગ્નેન્દ્વોઃ પ્રકૃતિસ્થા રૂપશીલગુણયુક્તા ।
ઓજે પુરુષાકારા દુઃશીલા દુઃખિતા ચૈવ ॥ ૨॥

અબલે સપ્તમભવને સૌમ્યેક્ષણવર્જિતે ચ કાપુરુષઃ ।
ભવતિ પતિશ્ચરભેઽસ્તે પ્રવાસશીલો ભવેદ્ ભ્રાન્તી ॥ ૩॥

બાલ્યે વિધવા ભૌમે પતિસન્ત્યક્તા દિવાકરેઽસ્તસ્થે ।
સૌરે પાપૈર્દૃષ્ટે કન્યૈવ જારં સમુપયાતિ ॥ ૪॥

સિતકુજજીવેન્દુસુતૈર્બલિભિર્લગ્ને સમશ્ચ યદિ રાશિઃ ।
સ્ત્રી બ્રહ્મવાદિની સ્યાત્ સુશાસ્ત્રકુશલા પ્રતીતા સા ॥ ૫॥

પુઞ્જન્મફલં યદ્યન્ન ઘટતિ વનિતાસુ તત્તાસામ્ ।
વક્તવ્યં રાજ્યાદ્યં વૃષણવિનાશાદિ વા પાપમ્ ॥ ૬॥

॥ ઇતિ શ્રીવરાહમિહિરવિરચિત લઘુજાતકે સ્ત્રીજાતકાધ્યાયઃ ચતુર્દશઃ ॥

## અથ નિર્યાણાધ્યાયઃ ॥ ૧૫॥

સૂર્યાદિભિર્નિધનગૈર્હુતવહસલિલાયુધજ્વરામયજ્ઞઃ ।
ક્ષુત્તૃટ્કૃતશ્ચ મૃત્યુઃ પરદેશે નૈધને ચરભે ॥ ૧॥

યો વા નિધનં પશ્યતિ બલવાંસ્તદ્ધાતુકોપજો મૃત્યુઃ ।
લગ્નાત્ ત્ર્યંશપતિર્વા દ્વાવિંશઃ કારણં મૃત્યોઃ ॥ ૨॥

સુરપિતૃતિર્યઙ્નરકાન્ ગુરુરિન્દુસિતાવસૃગ્રવી જ્ઞયમૌ ।
રિપુરન્ધ્રત્ર્યંશકપા નયન્તિ ચાઽસ્તારિનિધનસ્થાઃ ॥ ૩॥

ષષ્ઠાષ્ટમકણ્ટકગો ગુરુરુચ્ચો ભવતિ મીનલગ્ને વા ।
શેષૈરબલૈર્જન્મનિ મરણે વા મોક્ષગતિમાહુઃ ॥ ૪॥

ગુરુરુડુપતિશુક્રૌ સ્યૂર્યભૌમૌ યમજ્ઞૌ
વિબુધપિતૃતિરશ્ચો નારકીયાંશ્ચ કુર્યુઃ ।
દિનકરશશિવીર્યાઽધિષ્ઠિતત્ર્યંશનાથાઃ
પ્રવરસમનિકૃષ્ટાસ્તુઙ્ગહ્રાસાદનૂકે ॥ ૫॥

॥ ઇતિ શ્રીવરાહમિહિરવિરચિત લઘુજાતકે નિર્યાણાધ્યાયઃ પઞ્ચદશઃ ॥

## અથ નષ્ટજાતકાધ્યાયઃ ॥ ૧૬॥

ગોસિંહૌ જિતુમાષ્ટમૌ(મિથુનાષ્ટમૌ) ક્રિયતુલે કન્યામૃગૌ ચ ક્રમાત્
સંવર્ગ્યા દશકાષ્ટસપ્તવિષયૈઃ શેષાઃ સ્વસઙ્ખ્યાગુણાઃ ।
જીવારાસ્ફુજિદૈન્દવઃ(વાઃ) પ્રથમવચ્છેષા ગ્રહાઃ સૌમ્યવ-
દ્રાશીનાં નિયતો વિધિર્ગ્રહયુતૈઃ કાર્યા ચ તદ્વર્ગણા ॥ ૧॥

સપ્તાહતં ત્રિઘનભાજિતશેષમૃક્ષં
દત્વાઽથવા નવ શિશોધ્ય નવાઽથવા સ્યાત્ ।
એવં કલત્રસહજાત્મજશત્રુભેભ્યઃ
પ્રષ્ટુર્વદેદુદયરાશિવશેન તેષામ્ ॥ ૨॥

વર્ષર્તુમાસતિથયો દ્યુનિશં હ્યુડૂનિ
વેલોદયર્ક્ષનવભાગવિકલ્પનાઃ સ્યુઃ ।
ભૂયો દશાદિગુણિતાઃ સ્વવિકલ્પભક્તા
વર્ષાદયો નવકદાનવિશોધનાભ્યામ્ ॥ ૩॥

વિજ્ઞેયા દશકેષ્વબ્દા ઋતુમાસાસ્તથૈવ ચ ।
અષ્ટકેષ્વપિ માસાર્ધં તિથયશ્ચ તથા સ્મૃતાઃ ॥ ૪॥

દિવારાત્રિપ્રસૂતિં ચ નક્ષત્રાનયનં તથા ।

સમ્રસઙ્ખ્યેઽપિ વર્ગે તુ નિત્યમેવોપલક્ષયેત્ ॥ ૫॥

વેલામથ વિલગ્નં ચ હોરામંશકમેવ ચ ।
પઞ્ચકેષુ વિજાનીયાન્નષ્ટજાતકસિદ્ધ્યે ॥ ૬॥

॥ ઇતિ શ્રીવરાહમિહિરવિરચિત લઘુજાતકે નષ્ટજાતકાધ્યાયઃ ષોડશઃ ॥

॥ ઇતિ વરાહમિહિરાચાર્યકૃતે લઘુજાતકગ્રન્થઃ સમાપ્તઃ ॥

Encoded and proofread by Radu Canahai,
Reproofread by Marthi Narayana Sarma

1. edition: Krishnadas Academy, Varanasi-221001, 1983
2. Dr. K S Charak, Uma publications, Delhi, April 2008
3. daivagna vachaspati, Sri vasudeva,
Thakur Prasad Pustak Mandir, 1882

*laghujAtakam by varAhamihirAchArya*
pdf was typeset on October 30, 2022

Please send corrections to *sanskrit@cheerful.com*